Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# संस्कृतभाषाशिक्षणे अभिनयविधेः प्रासङ्गिकता

डा. इक्कुर्ति वेङ्कटेश्वर्लु
सहायकाचार्यः, शिक्षाविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

**Article Info**

Volume 7, Issue 1
**Page Number :** 95-99
**Publication Issue :**
January-February-2024

**Article History**
Accepted : 25 Jan 2024
Published : 15 Feb 2024

**शोधसारांशः-** संस्कृतभाषाधिगविकासाय नैकाः विधियः वर्तन्ते परन्तु विधिरयं प्रतिपदस्य संकेतं करोतीति कारणेण मातृभाषाविधेः सामानः भवति। अपि च अयं विधिः कक्ष्यायां छात्रान्। अतः अधिगमे अस्य प्रभावः भवतीति निश्चप्रचम्। अतः संस्कृताध्यापकाः प्राथमिकमाध्यमिककक्षासु संस्कृतकक्ष्याशिक्षणे अवश्यं एनं विधिम् उपयुञ्जे तेन संस्कृताधिगमः सुष्ठु जायेतेति शोधकर्तुः आशयः वर्तते।

**मुख्यशब्दाः**-संस्कृतभाषा, अभिनयविधिः, भाषाशिक्षणः, अधिगमः, संस्कृताधिगमः ।

**भाषा** – भाषा शब्दः भाष व्यक्तायां वाचि इत्यस्माद्धातोः गुरोश्च हलः इति सूत्रेण अ प्रत्यये स्त्रियां टापि निष्पद्यते। भाष्यते व्यक्तवाग् इति भाषा अथवा भाषाणात् भाषेत्याहुरिति। अयं भाषाशब्दः आङ्ग्लभाषायां Language इति व्यवह्रियते। यः लेटिन् भाषायाः Lingua इति पदात् निष्पन्नः। भाषा भावविनिमयाय समुचितं साधनम्। ये मनसि विचाराः जायन्ते ते ध्वन्यात्मना परिणताः भाषाशब्दवाच्या भवन्ति – प्लेटो। ध्वनिभिः मानवीयविचाराणां बौद्धिकाभिव्यक्तिरेव भाषा इत्यपि वक्तुं शक्यते – स्वीट्। Lingua may be defined as the expression of thought by means of speech sound – Henry sweet. इति पाश्चात्त्यानां मतमासीत्। भाषाकौशलानाञ्च महत्त्वस्थानं भजते। आदौ भाषाः चत्वारः प्रकाराः सन्ति। यथा – मनुष्यजन्तु– सरीसृपाः–पक्षिणां च। तदेतत् तुरीयं वाचोऽनिरुक्तं यत् मनुष्याः वदन्ति।

**अथैतद् तुरीयं वाचोऽनिरुक्तं यत् पशवो वदन्ति।**
**अथैतद् तुरीयं वाचोऽनिरुक्तं यत् वचासिं वदन्ति।**
**अथैतत्तुरीयं वाचोऽ-निरुक्तं यदिदं क्षुद्रसरीसृपं वदन्ति। (शत.ब्र.1.3.16)**
**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतस्सर्वाः प्रवृत्तयः।।**
**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।**
**वक्तुं भाषा एकम् अलौकिकसाधनं भवति।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**भाषया मानवः मनुष्यत्वं प्राप्नोति। ज्ञानवर्धनं,**

**मोक्षप्राप्तिरपि भाषया एव शक्यते।**

**देवत्वम्, ऋषित्वम् एवं वैदुष्यं च प्राप्नोति।**

एकस्य श्रेष्ठस्य समाजस्य वा राष्ट्रस्य वा निर्माणं भवति अपि च संघटनं कर्तुं शक्यते अनयैव भाषया। मानसिकविकासस्य कारणभूतायाः वाण्याः महिमायाः वर्णनं मानवेन किं क्रियते। मानवानां सम्पूर्णसंसारः भाषया वर्धितः भवति। एतादृश्या वाण्या विना समस्तं जगत् अन्धकारभूयिष्ठं जायते। शब्दतत्त्वविज्ञैः शब्दाः नित्याः आतिष्ठन्ते। वार्तिककारेणोक्तं – सिद्धे शब्दार्थसम्बन्धे इति। सिद्धशब्द इह नित्यपर्यायवाची। अतः शब्दाः नित्याः, अर्थाः नित्याः तेषां सम्बन्धोऽपि नित्यः इत्येतेषां मतम्। आधुनिकाः भाषाशास्त्रिणस्तु भाषा मानवस्य क्रमिकविकासस्य परिणाम इत्यभिप्रयन्ति।

**संस्कृतभाषा-** संस्कृतम् इति पदं सम् उपसर्गपूर्वकात् कृञ् धातोः कर्मणि क्त प्रत्यये सम्परिभ्यां करोतौ भूषणे इति सूत्रेण अलङ्करणेऽर्थे सुडागमे सिद्धम्। या भाषा संस्कृता परिमार्जिता परिशुद्धा परिपूर्णा अलङ्कारभूता च भवति, सा संस्कृतभाषोच्यते। संस्कृतभाषायां पाणिनिमते 63 वर्णाः सन्तिः। ते च – स्वराः 22, व्यञ्जनानि 33, अथोगवाहाः 8, स्वराणां ह्रस्वदीर्घा–प्लुतोदात्तानुदात्तस्वरितसानुनासिकनिरनुनासिकेति नैकभेदाः जायन्ते। अत्र त्रीणि वचनानि, त्रीणि लिङ्गानि, त्रयः पुरुषाः च सन्ति। संस्कृतस्य सर्वाणि पदानि चतुर्धा विभक्तानि। तथा च चत्वारः पदजाताः नामाख्यातोपसर्गनिपाताश्चेति। नाम – प्रातिपदिकम्, आख्यातम् – क्रियापदम्, उपसर्गः प्र, परा, अनु इत्यादयः, निपाताः – च, वा, एव प्रभृतयः, अव्ययानि च इति चतुर्धा विभक्ताः। संस्कृत–भाषा संश्लिष्टा वर्तते। अस्यां प्रकृतिप्रत्ययौ सम्मिलितौ भवतः। केवला प्रकृतिः, केवलः प्रत्ययो वा न प्रयोक्तुमर्ह इति व्याकरणशास्त्रम्। नित्यं पदं प्रयोक्तव्यं, पदं सुबन्तं तिङन्तञ्च भवति। पठने, भाषणे, लेखने वा प्रातिपदिकस्य, प्रत्ययस्य वैयक्तिकरूपेण प्रयोगादिकं नैव सम्भवति। अनयोः विभज्य व्यवहारः न कदापि कुत्रापि सिध्यति। एतादृशमहत्त्वपूर्णायाः वाङ्मयमनन्तम् अखण्डमद्वितीयञ्च दरीदृश्यते। वाङ्मयस्याधिगमः भाषायाः आधीने अस्ति। अतः भारतीयप्राचीनाधिगमप्रणाल्यां भाषाकौशलशिक्षणविधयः केचन प्रोक्ताः। वेदरक्षणार्थम् आगतानि वेदाङ्गानि। तत्र भाषारक्षणदृष्ट्या व्याकरणं, शिक्षा च महदुपकुरुतः। तत्र भाषायाः उच्चारणं कथं कर्तव्यम् ? दोषाः कुत्र भवन्ति ? तत्परिहारोपायाश्च के ? इति सम्यग्विवेच्य भाषाकौशलानां श्रवण – भाषण – पठन – लोखनानां नैके विधयः, प्रविधयः च प्रोक्ताः शिक्षाग्रन्थेषु। पाणिनीयशिक्षायाम् उच्चारणविधिः सदृष्टान्तं प्रत्यपादि।

**भाषाधिगमसोपानानि** :- भावाभिव्यक्तिसाधनं भाषा इति कथ्यते। मानवानां मनोगतभावानुगतं भावानां प्रकाशनाय क्रियमाणः ध्वन्यात्मकसङ्केत एव भाषा। भाषाविस्तृतिः यदा जाता, तदध्येतुं शिक्षणमप्यपेक्षितम्। भाषाशिक्षणं नाम भाषायाः अध्ययने प्रधानभूतानां ज्ञानात्मक – अवबोधात्मक –कौशलात्मक – अभिरुच्यात्मक – अनुभूत्यात्मकानां लक्ष्याणां प्राप्तिरेव। भाषायाः श्रवणं, भाषणं, पठनं, लेखनमिति चतुर्णां कौशलानां सम्पादनं कौशलात्मकेषु भवति। अम्बाम्बेति यथा बालः शिक्ष्यमाणः प्रभाषते (वाक्यपदीये) इति शिशोः मातृभाषाधिगमे शब्दानुकरणमेव आद्यं सोपानम्। अर्थमजानन् अन्यैरुक्तं श्रुत्वा तदेव उच्चारयितुं यतते। अनन्तरम् अर्थमवगच्छति स्म। क्रमेण सम्भाषणम्, अनन्तरं पठनं, ततः परं लेखनं च करोति। श्रवणं, भाषणं, पठनं, लेखनं च भाषाभ्यासस्य क्रमिकाणि सोपानानि। चतुर्षु कौशलेषु श्रवणं पठनं च ग्रहणकौशले, भाषणं लेखनं च अभिव्यक्तिकौशले अन्तर्भवतः।

**संस्कृतभाषाशिक्षणै उपायाः**

**सम्भाषणम्** :- बालकाः यानि वाक्यानि शृण्वन्ति, तान्येव पुनः वक्तुं प्रयतन्ते। तस्मिन् समये दोषाः क्रियन्ते। ते एव ज्येष्ठैः समीक्रियन्ते। विद्यालयस्य कक्ष्यायां, क्रीडाङ्गणे गृहे, चापि छात्रा अधिकाधिकतया वार्तालापं कुर्वन्ति। तस्मिन् समये भाषाकौशलं

वृद्धिं याति। कक्ष्यायामपि मध्ये मध्ये यथावसरं भाषणं कर्तुमध्यापकेन अवसरः प्रदेयः। यथावसरं छात्रेभ्यः ज्येष्ठैः शब्दावलिसम्बद्धविषये साहाय्यं देयम्। तथा प्रेरिता एव छात्राः सम्भाषणं कुर्वन्ति। एवमेव शब्दाधिगमः, भाषणकौशलविकासश्च जायेते। प्राचीनकालेऽपि गुरुकुलाश्रमेषु सहपाठिभिः सह आचार्येण सह च भाषणं कुर्वाणः सम्भाषणं शिक्षन्ते स्म। तत्र सम्भाषण-भाषणकौशलवर्धनार्थं संस्कृतसाहित्ये काश्चनप्रक्रियाः निर्दिष्टाः सन्ति। ते च यथा –

**कथाकथनम् -** कथानां प्राधान्यं भाषाशिक्षणे दृश्यते। श्रवणकौशलाय शिक्षकः कथाः श्रावयेत्। प्राचीनाधिगमप्रणाल्यां कथाः प्रभावाधिगमाय उपायुज्यन्त। वेदारभ्य काव्यपर्यन्तं कथाः छात्रान् प्रभावात्मकाधिगमाय (For affective Learning) अबोधयन्। प्रधानतया विष्णुशर्मणा विरचित पञ्चतन्त्रकथाकाव्यात् तत्र विद्यमान कथाः कथाकथनविधिना पाठनेन च मूर्खाः राजपुत्राः षण्णमासेषु सम्यगधीत्य उत्तमव्यवहारसम्पन्नाः भूत्वा प्रत्यागताः इति निश्चप्रचम्।

अभिनयः – प्राचीनाधिगमप्रणाल्यां नाटकशिक्षणं छात्रान् अत्यन्तं प्रभावयन्ति स्म। तत्र अभिनयः छात्रमानसिकचित्तम् आकार्षति। आधुनिकेऽपि कञ्चित् प्रसङ्गं छात्राणां पुरतः विवृत्य तम् अभिनयेन यथा प्रदर्शयेयुः तथा छात्राः प्रोत्साहनीयाः। कः छात्रः किं पात्रं निर्वहेत् इति निश्चित्य तत्सम्बद्धं सम्भाषणमपि यदि सकृत् पाठ्यते तर्हि छात्रा उत्साहेन अभिनये प्रवृत्ताः भवन्तीति धिया भारतीयप्रा चीनसाहित्ये नाटकरचना नाटके प्रधानतया अभिनयः शिक्षते स्म।

भाषाशिक्षणे अध्यापकः काञ्चन उपायान् तु चिन्तयत्येव तत्र संस्कृतभाषाशिक्षणे तु अभिनयविधिः अत्युपकरोतीति नास्ति संशयः लेशमात्रोऽपि ।

**अभिनयविधिः** :- अभि इत्युपसर्गपूर्वक नी धातोः अच् प्रत्यये सति अभिनयः इति शब्दः निष्पन्नो भवति। अस्यार्थः नाटकीयप्रदर्शनं, संकेतप्रकटनम् इति। व्युत्पत्तिः इत्थं भवति साहित्यदर्पणे अभिनय इति शब्दस्य भवेदभिनयोऽवस्थानुकार इति सः चतुर्विधः आङ्गिको वाचिकश्चैवमाहार्यः सात्विकस्तथा इति। अभिनयो नाम कस्यापि दशाया अनुकरणं भवति।

**आङ्गिकम् -** शारीरिकचेष्टाद्वारा अभिव्यक्तीकरणम्।

**वाचिकम् -** शब्दद्वारा प्रकटीकरणम्।

**आहार्यम् -** वेषभूषादि अलङ्कारणद्वारा अभिव्यक्तीकरणम्।

**सात्विकम् -** स्वेदरोमाञ्चादिद्वारा आन्तरिकभावानां प्रकटीकरणम्।

शिक्षाक्षेत्रे अभिनयद्वारा किं वा साधयितुं शक्येत ते विषयप्रस्ताव एव अस्य अध्यायस्य मुख्योद्देश्यं भवति। अस्यैव शिक्षाप्रविधौ उद्दीपनकौशलमित्युच्यते। भाषाशिक्षणे अस्योद्दिपनकौशलस्य महाती आवश्यकता वर्तते। कुतो चेत् संस्कृतभाषा प्रायः बहूनां मातृभाषा नास्ति। तेन कारणेन अनुवादादि विधिभ्यः अभिनयादि विधीनां प्रभावो महानिति मे अभिप्रायः।

Abhinaya Vidhi is a methodology in language teaching that originated in ancient India. It's a holistic approach that integrates physical, emotional, and intellectual aspects to facilitate language learning. Here are some key components of Abhinaya Vidhi:

1. Total Physical Response (TPR): Using gestures, postures, and facial expressions to convey meaning.
2. Emotional Connection: Associating emotions with language to enhance memory and retention.
3. Storytelling: Using narratives to teach language in context.
4. Role-playing: Practicing real-life scenarios to develop communication skills.

5. Gestures and Mudras: Using hand gestures and mudras (symbolic hand positions) to reinforce language.
6. Rasa Abhinaya: Exploring emotions and empathy through language.
7. Bhava: Focusing on the emotional essence of language.
8. Sthayi Bhava: Developing a stable emotional connection with language.
9. Vyabhichari Bhava: Exploring transitory emotions in language.
10. Anubhava: Encouraging personal experiences and reflections in language learning.

Abhinaya Vidhi aims to create a immersive and engaging language learning environment, where learners can develop a deeper connection with the language and culture. This approach can be applied to various languages, including Indian languages like Sanskrit, Hindi, and regional languages.

When a pupil learns by doing, he is reliving both mentally & physically, some experience which has proved important to the human race.

**परिचय:** - अभिनयस्यायमर्थ: भवति यत् कोऽपि छात्र:, राणाप्रताप:, गौतमबुद्ध:, शिवाजी इत्यादीनाम् ऐतिहासिकव्यक्तीनां जीवनचरित्रसम्बन्धात्मकं किमपि प्रसङ्गमधिकृत्य नटति, अस्य साधनस्य समुचितप्रयोगेन इतिहासाध्ययनं विशेषरूपेण आकृष्य छात्राणां मनसि
तच्चित्रम् उपस्थपितं भवति।

**स्वरूपम्** - Importance of Dramatization. अनुकरणं नाम भावप्रकाशनविधि: इत्यपि उच्यते। विधावस्मिन् छात्र: संवादं पठन् गच्छति, अध्यापकश्च कायिक, वाचिक, सात्विकाभिनयं करायेत्येव । बालकेषु वैशिष्ट्यमिदमस्त यत् ते सर्वदा यस्मिन् कस्मिन् कार्यकरणे उपस्थिता: भवन्ति। ज्येष्ठा: वृद्धा: यत्कार्यं कुर्वन्ति तदनु तेऽपि तत्कार्यकरणे निमग्ना: भवन्ति, आनन्दमप्यनुभवन्ति च। तदेव अनुकरणमित्युच्यते। उदाहरणं पशुपालनं, पोषणञ्च। बालका: कमपि अभिनयं स्वयं कर्तुं न शक्नुवन्ति। तेषाम् अभिनयप्रवृत्तिस्तु सर्वदा अनुकरणात्मिका भवति। यत: जन्मत: एव तेषामनुकरणाभिनयस्य ज्ञानं सिध्यति।

It is sometimes assumed that children are born actors and have a dramatic instinct. Their attempts to dramatize stories must naturally be successful and have an educational value. But a child's dramatic instinct its essentially imitative. Avery young chill will often do something quite spontaneously in imitation of another's action.

अत: बालका: राजा, सैन्याधिकारी, अध्यापक:, कृषक: इत्यादीनामनुकरणे चातुर्यं प्रदर्शयन्ति। अनुकरणं, क्रियाशीलप्रवृत्तिरिति बालकानां वैशिष्ट्ये भवत:। शिक्षकस्य प्रधानकर्त व्यमपि बालकेषु एतासां शक्तीनां विकासकरणे साहाय्यम् आचरणीयम्। इतिहासादेव एतत् साध्यं भवति, यतो हि इतिहासघटनानां भाण्डार: भवति। नाटकीयोपायेन सर्जनात्मकशक्ते: विकास: अवश्यं सिध्यति। पाश्चात्त्यमनोविज्ञानिना प्रोबेल महोदयेनापि एतासां शक्तीनां विकासे बलं दत्तम्। बालकप्रिय: स: तेषां विकासाय कीडायां प्रामुख्यं दत्तवान्। यत: क्रीडाद्वारेव बालकानां स्वभाविकप्रवृत्ते: विकास: भवति। एवमेव जान् डीवी इति अपर मनोवैज्ञानिक: क्रियाया: कृते महत्त्वं दत्तवान्। अनेनैव प्रकारेण बालकानां प्राकृतिकशक्तीनां विकास: भवति। अत: शिक्षणाय अभिनय: एकं महत्वपूर्णं साधनमस्ति। यस्माच्च बालकानां विकास: अवश्यं भवेत्। नाटकीयप्रवृत्तिद्वारा ऐतिहासिक-घटनानां सजीवत्वम् अस्माकं पुरत: स्थास्यति। नाटकसम्बद्धानि पात्राणि सजीवरूपेण सर्वेषां जनानां

विचारभावनादिषु बलं दत्वा समाजश्रेयस्कराय श्रेष्ठनागरिकतासम्पादने च सहकाररूपेण चिरं स्थास्यन्ति। मानवानां जीवनम् अल्पकालिकं भवति। मानवजीवनं दुर्लभमपि। अत: उत्तमजीवनाय अवश्यमेतेषाम् ऐतिहासिकघटनानामुपरि महत्त्वं दातव्यम्। ऐतिहासिकपात्रेभ्य: केवलम् उत्तमनायकानामनुकरणं कार्यम्। उदा – श्रीरामचन्द्रसत्यहरिश्चन्द्रादीनां पात्राणि महत्त्वपूर्णानि यानि अवश्यम् अस्माभि: ज्ञातव्यानि। रामादिवत् वर्तितव्यं न रावणादिवत् इति सूक्त्यनुसारं यदि रावणवत् प्रवर्तते कश्चित् निन्दार्ह: भवति। रामवत् प्रवर्तने न तस्यावश्यं नीराजनं भवेत्प्रक्रिया – अभिनयस्य वर्गीकरणं द्विधा विभक्तुं शक्यते। तद्यथा –

1. आशुकाभिनय: (Extempore Dramatization) – एतत्प्रकारक अभिनय: शिक्षाप्रद: सूचनात्मकश्च भवति। बालकानां मानसिकक्रिया: प्रोत्साहिता: स्यु:। तेषां विचारशक्ते: विकास: अपि भवेत्। एतदतिरिच्य अयं शिक्षणाय बहुलाभप्रद: भवति।

2. सज्जीकृताभिनय: (Prepared Dramatization) – बालका: आदित: एव संवादेषु सज्जीकरणीया: भवन्ति। तेषां संवादान् पूर्णतया स्मर्तुमवसर: दीयते। तथैव भाषायामपि ईषत् परिवर्तनमानेतुं प्रयतते। परन्तु तेषु मानसिकस्तरं विस्तारयितुं न शक्यते।

**सन्दर्भग्रन्थसूची**

1. आपस्तम्बगृह्यसूत्रम् – लक्ष्मीनरसिंहाचार्य:, गायत्री प्रकाशनम्, हैदराबाद्.
2. आपस्तम्बधर्मसूत्रम् – श्री हरिदत्तमिश्र:, चौखम्भा संस्कृत संस्थान, वारणासि,1999.
3. आपस्तम्बीयं श्रौतसूत्रम् – श्रीनिवासगोपालाचार्य, O.R.I.,Mysore, 1953.
4. ईशादि नौ उपनिषद् – गीताप्रेस्, गोरखपूर्.
5. प्राचीनभारत की शिक्षा पद्धति – डा.कृष्णकुमार, मयंक प्रकाशन, हरिद्वार, 1999.
6. वेदों मे समाजशास्त्र अर्थशास्त्र और शिक्षाशास्त्र – डा.कपिलदेव द्विवेदी, विश्वभारती अनुसन्धान परिषद, ज्ञानपुर.
7. वैदिकशिक्षापद्धति: – डा.भाष्यकरमिश्र:, महर्षिसान्दीपनि राष्ट्रियवेदविद्याप्रतिष्ठानम्,उज्जयिनि, 2003.
8. Ancient learning system – Prof. V. Muralidhara Sharma, Professor of Education, R.s.v.p., Tirupati.
9. संस्कृतशिक्षणम् – डा.उदय शङ्कर झा, चौखम्बासुरभारती प्रकाशनम्, वारणासि.
10. साहित्यशिक्षणविधय: – डा.एन् लता, आर्.यस्.वि.पि., तिरुपति, 2007.
11. Bhawna mishra – Teaching learning process and Child Developement; Mohit Publications, New Delhi, 2000.